Jan 2011

(1)

# श्री सुरसरस्वती सभा शृङ्गेरि

## तृतीया परीक्षा

### प्रथमपत्रिका

दिनाङ्कः - ३०-०१-२०११ अङ्काः-१००

पूर्वाह्ने - १०-०० तः १-०० पर्यन्तम् समयः-३-०० होराः

**1 अष्टानां प्रश्नानां एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।** 8×1=8

१. वाग्देवता स्वहस्तेषु किं किं धारयति ?

२. बालिकायाः हस्ते किमासीत् ?

३. एकलव्यः कः ?

४. शङ्कराचार्यः कदा अवातरत् ?

५. राक्षसाः के ?

६. भूतानां प्रलयोदयौ कौ ?

७. रावणस्य कोपः कथमभवत् ?

८. कः यावज्जीवं दहति ?

९. चित्रग्रीवः कः ?

१०. कृषिं कुर्वता ब्राह्मणेन किं न लब्धम् ?

**2 पञ्चानां वक्यद्वयेन संस्कृतभाषया उत्तरं लिखत ।** 5×2=10

१. मल्लः परिकरं बध्वा राजानं किमुवाच ?

२. कौशिकः पक्षिणं कुतः क्रूरया दृष्ट्या अपश्यत् ?

३. द्रोणः एकलव्याय किमुत्तरं प्रायच्छत् ?

४. शुकशावकयोर्नाम किम् ?

५. गोप्यानि कानि ?

६. अमरशक्तेः पुत्राः के ? कीदृशास्ते ?

**3 त्रयाणां संस्कृतभाषया उत्तरं लिखत।** 3×3=9

१. सुमतेरभिप्रायं विवृणुत ।



पश्चादनुवर्तते

Jan 2011

(2)

२. ब्राह्मणपुत्रः दीनारकं दृष्ट्वा किं चिन्तितवान् ?

३. मल्लः परिकरं बध्वा राजानं किमुवाच ?

४. कालिदासः कथं समस्यामपूरयत् ?

**4** **त्रयाणामुत्तरं मातृभाषया / आङ्लभाषया वा लिखत ।** 3x4=12

१ 'आहारशुद्धौ सत्वशुद्धिः' उक्तिमिमां पाठानुसारं विवृणुत ।

२. 'वागाडम्बरवान् लोके न किञ्चित्कर्तुमर्हति' सोदाहरणं स्पष्टयत।

३. 'ब्राह्मणः सर्पश्च' अस्य पाठस्य सारांशं लिखत ।

४. वायसेन किमनिष्टं दृष्टम्? तत्परिणामं विशदयत ।

**5** **चतुर्णां ससन्दर्भं विवरणं स्वोत्तरभाषया लिखत ।** 4x3=12

१. नाहं विद्याविक्रयं करोमि ।

२. अग्निसदृशाः द्विजाः पृथिवीमपि दहेयुः ।

३. जरारोगवर्जितो वज्रकायो भविष्यसि ।

४. न हि किञ्चित् गुरवे अदेयम् ।

५. प्रत्यासन्नविपत्तिमूढमनसां प्रायो मतिः क्षीयते ।

**6** **द्वयोः सान्वयमर्थं स्वोत्तरभाषया लिखत ।** 2x3=6

१. तस्मिन्विप्रकृताः काले तारकेण दिवौकसः ।
तुरासाहं पुरोधाय धाम स्वायंभुवं ययुः ।।

२. अभिवाद्याथ सकलान् अमरान् पवनात्मजः ।
पुप्लुवे च गिरेस्तस्मात् विलङ्घयितुमर्णवम् ।।

३. यथा कन्दुकपातोनोत्पतत्यार्यः पतन्नपि ।
तथा त्वनार्यः पतति मृत्पिण्डपतनं यथा ।।

**7** **श्लोकद्वयं पूरयत ।** 2x3=6

१. राजा + .................................. न वेति ।।

२. शान्ताकारं + ...................................... सर्वलोकैकनाथम् ।।

३. रविनिशाकरयोः + ...................................... मतिः ।।

**8** **मातृभाषया अनुवादं कुरुत ।** 5

राजाप्युज्जयिनीं समया हायनमेकं ब्रह्मचर्येण मन्त्रं सञ्जाप्य दूर्वादलैर्हुत्वा पूर्णाहुतिमकरोत् । तावद्धोमकुण्डात् कश्चित् पुरुषो निर्गत्य दिव्यमेकं फलं राज्ञे प्रायच्छत् । राजापि तत्फलं गृहित्वा कृतकृत्यः पुरं प्रविश्य राजमार्गे समागच्छन् कुष्ठव्याधिपरिपीडितं कञ्चन विप्रमपश्यत् ।

**9** **रिक्तस्थानानि पूरयत ।** 4x1=4

१. दृश् धातोः लोट् मध्यमपुरुषरूपम् .................. ।

२. मल्लस्य नाम ...................... ।

३. कुमारसम्भवं महाकाव्यं .................. विरचितम् ।

४. मारुतेवैदेही .................. ददौ ।

**10** **त्रयाणां पर्यायपदानि लिखत ।** 3x1=3

१. अर्णवम् २. ब्रह्मा ३. वायसः ४. धरणी

**11** **त्रयाणां विरुद्धार्थकपदानि लिखत ।** 3x1=3

१. शुभम् २. प्रकाशः ३. बन्धनम् ४. हितः

**12** **वाक्यदोषं परिहरत ।** 3x1=3

१. द्रोणस्य सह अर्जुनः अगच्छत् ।

२. किमहं करोति ?

३. शङ्कराचार्यैः चत्वारः मठाः स्थापितः ।

**13** **स्ववाक्ये योजयत । (त्रीणि एव)** 3x1=3

१. पश्चात् २. उपसृत्य ३. नमः ४. अमन्यत



पश्चादनुवर्तते

**14** **इतरपुरुषवचनरूपाणि लिखत ।** 3x1=3

१. वसतु २. अयाचत

**15** **सन्धिं विभज्य नाम लिखत । (त्रयाणामेव)** 3x1=3

१. अथैकस्मिन् २. वाङ्महिमा ३. अतस्तस्य ४. खल्विमाम्

**16** **सन्धिकार्यं कृत्वा नाम लिखत । (त्रयाणामेव)** 3x1=3

१. रावणः + अथ २. मुनिः + इति

२. गर्जत् + घनाः ४. देवता + इयम् ।

**17** **अर्थविवरणेन सह लोकोक्तिमेकां पूरयत ।** 1x3=3

१. प्रक्षालनाद्धि + ............................ वरम् ।

२. संभावितस्य + ........................... अतिरिच्यते ।

**18** **प्रयोगपरिवर्तनं कुरुत ।** 2x1=2

१. छात्रः वेदान् पठितवान् ।

२. तेन पूजा न कृता ।

**19** **व्याकरणविशेषं लिखत । (एकस्य)** 1x2=2

१. वायसेन सह

२. विषादं मा कृथाः

* * * * *

# श्री सुरसरस्वती सभा शृङ्गेरि

## तृतीया परीक्षा

### द्वितीयपत्रिका

दिनाङ्कः – ३०-०१-२०११ | अङ्काः–५०

अपराह्ने – १-३० तः ३-०० पर्यन्तम् | समयः–सार्धैकहोरा

**1 अ) दशभिः वाक्यैः संस्कृतभाषया प्रबन्धमेकं लिखत :-** 5

१. गजः   २. सुभाषितम्   ३. संस्कृतभाषा

**आ) संस्कृतभाषया पत्रमेकं लिखत :-** 5

१. क्षेत्राटनविषये मित्राय पत्रं लिखत ।

२. उद्योगार्थं अभ्यर्थनापत्रं लिखत ।

**2 द्वयोः लक्षणं सोदाहरणं आङ्ग्लभाषया कर्णाटकभाषया वा लिखत।** 6

१. विशेषणानि   २. क्त्वान्ताव्ययम्   ३. उपसर्गाः

**3 त्रिषु पुरुषवचनेषु लिखत । (द्वावेव)** 4

१. ज्ञास्यति   २. वसेत्   ३. मोदताम्

**4 एकस्य रूपाणि सर्वविभक्तिवचनेषु लिखत ।** 3

१. ब्रह्मन्   २. मनस्   ३. दिश्

**5 वाक्यदोषान् परिहरत ।** 3

१. बालः क्षीरेण अपिबत् ।   २. पित्रा सह पुत्राः अगच्छत् ।

३. जलं मीनाः सन्ति ।

**6 प्रयोगं परिवर्तयत ।** 3

१. शिशुपालेन कृष्णः अनिन्द्यत ।   २. वधूः आकाशे नक्षत्रं पश्यति ।

३. सूदेन अन्नम् अपच्यत ।

**7 कर्तृ - कर्म - क्रियापदानि निर्दिशत ।** 3

१. नार्यः भगवन्तम् विश्वेश्वरं अर्चयन्ति ।



पश्चादनुवर्तते

२. छात्रः विद्याभ्यासाय शालां गच्छति ।

३. मुनिः वने तपः करोति ।

**8** **अन्यलिङ्गरूपं लिकत । (त्रयाणामेव)** 3

१. गच्छन्  २. कुर्वाणः  ३. भीता  ४. जनकः

**9** **वाक्यमेकं स्वोत्तरभाषया विवृणुत** 3

१. यथा बीजं तथाङ्कुरः ।

२. चिन्ता समं नास्ति शरीरशोषणम् ।

**10** **मातृभाषया अनुवादं कुरुत :-** 5

१. न हि सर्वः सर्वं जानाति ।

२. अहमद्य भीमेन सह स्पर्धेय ।

३. वायुना वृक्षाः कम्पन्ते ।

४. गौरी गायति, तूष्णीं भवत ।

५. मृत्तिकया घटः, सुवर्णेन आभरणं च भवतः ।

**10** **संस्कृतभाषया अनुवादं कुरुत ।** 5

१. ನೀವು ಶ್ರದ್ಧೆಯಿಂದ ಓದಿರಿ.
You study with faith.

२. ವೈದ್ಯರೇ, ಮಗುವಿಗೆ ಔಷಧವನ್ನು ಕೊಡಿರಿ.
Oh Doctor, give medicine to the child.

३. ನಕ್ಷತ್ರಗಳು ಆಕಾಶದಲ್ಲಿ ಹೊಳೆಯಲಿ.
Let the stars twinkle in the sky.

४. ಒಮ್ಮೆ ನಾನು ಕಾಡಿನಲ್ಲಿ ಹುಲಿಯನ್ನು ನೋಡಿದೆನು.
Once I saw a tiger in the forest.

५. ಎಲ್ಲರೂ ಕಷ್ಟಕಾಲದಲ್ಲಿ ಧೈರ್ಯದಿಂದ ಇರಬೇಕು.
All should be brave in times of difficulty.

* * * * *